# Shataratna Sangraha

# શતરત્નસઙ્ગ્રહ

## Document Information

Text title : shataratnasaMgraha

File name : shataratnasaMgraha.itx

Category : shiva, sangraha, major_works

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Latest update : February 18, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 11, 2024

*sanskritdocuments.org*

# શતરત્નસઙ્ગ્રહ

(॥ ઉમાપતિ શિવાચાર્ય ॥)

શિવં પ્રણમ્ય પરમં નિધનેશમતઃ પરમ્ ।
જ્ઞાનદીક્ષે પ્રવક્ષ્યામિ તે શ‌ૃણુધ્વં સમાહિતાઃ ॥ ૧॥
– સ્વાયમ્ભુવાગમઃ ॥ વિદ્યાપાદઃ । ૧-પશુવિચારઃ । ૧॥

અથાત્મમલમાયાખ્યકર્મબન્ધવિમુક્તયે । (અથાઽઽત્મ)
વ્યક્તયે ચ શિવત્વસ્ય શિવાજ્જ્ઞાનં પ્રવર્તતે ॥ ૨॥
– સ્વાયમ્ભુવાગમઃ ॥ વિદ્યાપાદઃ । ૧-પશુવિચારઃ । ૨॥

જ્ઞાનં દ્વિવિધામાખ્યાતં પરં ચૈવાપરં સ્મૃતમ્ ।
પરં ચૈવાબોધાખ્યમપરં શાસ્ત્રમુત્તમમ્ ॥ ૩॥
– દેવ્યામતમ્ ॥ ??॥

સૃષ્ટિકાલે મહેશાનઃ પુરુષાર્થપ્રસિદ્ધયે ।
વિધત્તે વિમલં જ્ઞાનં પઞ્ચસ્રોતોઽભિલક્ષિતમ્ ॥ ૪॥
– મૃગેન્દ્રાગમઃ ॥ વિદ્યાપાદઃ । ૧-ઉપોદ્ઘાતપ્રકરણમ્ । ૨૧॥

જ્ઞાનમેતચ્છિવક્ષ્મોત્થં સઙ્ગૃહાણાત્મભેષજમ્ ।
પરિણમસુખં સ્વાદુ વિશેષગુણદર્શકમ્ ॥ ૫॥
– પરાખ્યતન્ત્રમ્ ॥ ૧-પશુપદાર્થવિચારઃ । ૩॥

ધર્મેણ સાધ્યતે ધર્મી ક્વચિત્કાર્યેણ કારણમ્ ।
કારણેન ક્વચિત્કાર્યં ક્વચિદામ્નાયદર્શનાત્ ॥ ૬॥
– મતઙ્ગપારમેશ્વરાગમઃ ॥ વિદ્યાપાદઃ । ૩-લયભોગાખ્યતત્ત્વદ્વયવિચારપ્રકરણમ્ । ૯॥

અચેતનસ્ય માયાદેઃ પ્રવર્તકતયા પતિઃ । (પ્રવર્ત્તકતયા)
સિદ્ધઃ સર્વાર્થવિત્કર્તા વ્યાપકઃ સતતોદિતઃ ॥ ૭॥
– વિશ્વસારોત્તરમ્ ॥ ??॥

દૃક્ક્રિયાત્મકમૈશ્વર્યં યસ્ય તદ્ગાત્રપૂર્વકમ્ ।

(તદ્ધાત્રપૂર્વકમ્ , તદ્દાતૃપૂર્વકમ્ , તદ્ધાતૃપૂર્વકમ્)
ઈશ્વરઃ સોઽત્ર મન્તવ્યઃ શક્તિદ્વયયુતઃ પ્રભુઃ ॥ ૮॥
– પરાખ્યતન્ત્રમ્ ॥ ૨-પતિદાર્થવિચારઃ । ૭૮॥

અથ પત્યુર્ધિષ્ઠાનં સ્વશક્તિકિરણાત્મકમ્ ।
તસ્યાં દિવિ સુદીપ્તાત્મા નિષ્કમ્પોઽચલમૂર્તિમાન્ ॥ ૯॥
– મતઙ્ગપારમેશ્વરાગમઃ ॥ વિદ્યાપાદઃ । ૩-લયભોગાખ્યતત્ત્વદ્વયવિચારપ્રકરણમ્ । ૧॥

કાષ્ઠા સૈવ પરા સૂક્ષ્મા સર્વદિક્કાઽમૃતાત્મિકા ।
પ્રધ્વસ્તાવરણા શાન્તા વસ્તુમાત્રાઽતિલાલસા ॥ ૧૦॥
આદ્યોન્તોપરતા સાધ્વી મૂર્તિત્વેનોપચર્યતે । (સાધ્વમૂર્તિ)
– મતઙ્ગપારમેશ્વરાગમઃ ॥ વિદ્યાપાદઃ । ૩-લયભોગાખ્યતત્ત્વદ્વયવિચારપ્રકરણમ્ । ૨-૩અ॥

વપુષોઽવિદ્યમાનત્વાદ્યદ્યત્કૃત્યં કરોતિ સઃ ।
તત્ર તત્રાસ્ય તત્કર્તૃવપુષાઽનુકૃતં વપુઃ ॥ ૧૧॥
– મૃગેન્દ્રાગમઃ ॥ ક્રિયાપાદઃ । ૩-અર્ચાપ્રકરણમ્ । ૪૧॥

કરણં ચ ન શક્ત્યન્યચ્છક્તિર્નાચેતના ચિતઃ ।
વિષયાનિયમાદેકં બોધે કૃત્યે ચ તત્તથા ॥ ૧૨॥
– મૃગેન્દ્રાગમઃ ॥ વિદ્યાપાદઃ । ૩-પતિલક્ષણપ્રકરણમ્ । ૪॥

યથા કાલો હ્યમૂર્ત્તોઽપિ દૃશ્યતે ફલસાધકઃ ।
એવં શિવો હ્યમૂર્ત્તોઽપિ કુરુતે કાર્યમિચ્છયા ॥ ૧૩॥
– કિરણાગમઃ ॥ વિદ્યાપાદઃ । ૩-કર્મપટલઃ । ૧૦॥

શક્તોદ્યુક્તપ્રવૃત્તશ્ચ કર્તા ત્રિવિધ ઇષ્યતે । (શક્તોદ્યુક્તઃ પ્રવૃત્તશ્ચ)
શક્તેઃ પ્રવૃત્તિભેદેન ભેદસ્તસ્યોપચારતઃ ॥ ૧૪॥
– મૃગેન્દ્રાગમઃ !!

નિમિત્તમીશ્વરાખ્યં તદ્યદૃષ્ટં સહકારણમ્ । (યદૃષ્ટં)
ઉપાદાનં ચ યત્સૂક્ષ્મં સર્વકાર્યેષુ સંહિતમ્ ॥ ૧૫॥
– પરાખ્યતન્ત્રમ્ ॥ ૨-પતિદાર્થવિચારઃ । ૨૯॥

મૂર્ત્તાઃ સાવયવા યેઽર્થા નાનારૂપપરિચ્છદાઃ ।
સ્થૂલાવયવશિષ્ટત્વાદ્બુદ્ધિમદ્ધેતુપૂર્વકાઃ ॥

અતોઽસ્તિ બુદ્ધિમાન્કશ્ચિદીશ્વરઃ સમવસ્થિતઃ ॥ ૧૬॥
– પરાખ્યતન્ત્રમ્ ॥ ૨-પતિદાર્થવિચારઃ । ૨-૩અ॥

જગજ્જન્મસ્થિતિધ્વંસતિરોભાવવિમુક્તયઃ ।
કૃત્યં સકારકફલં જ્ઞેયમસ્યૈતદેવ હિ ॥ ૧૭॥
– મૃગેન્દ્રાગમઃ ॥ વિદ્યાપાદઃ । ૨-પરમોક્ષનિરાસપ્રકરણમ્ । ૩॥

સ્વાપેઽપ્યાસ્તે બોધયન્બોધયોગ્યાન્રોધ્યાન્રુન્ધન્પાચયન્કર્મિકર્મ ।
માયાશક્તીર્વ્યક્તિયોગ્યાઃ પ્રકુર્વન્પશ્યન્સર્વં યદ્યથાવસ્તુજાતમ્ ॥ ૧૮॥
– મૃગેન્દ્રાગમઃ ॥ વિદ્યાપાદઃ । ૪-પતિસ્વરૂપનિરૂપણમ્ । ૧૫॥

દેહાન્યોઽનશ્વરો વ્યાપીવિભિન્નઃ સમલોઽજડઃ ।
સ્વકર્મફલભુક્કર્તા કિઞ્ચિજ્જ્ઞઃ સેશ્વરઃ પશુઃ ॥ ૧૮/૧૯॥
– પરાખ્યતન્ત્રમ્ ॥ ૧-પશુપદાર્થવિચારઃ । ૧૫॥

અથાઽનાદિમલઃ પુંસાં પશુત્વં પરિકીર્ત્તિતમ્ ।
તુષકમ્બુકવદ્જ્ઞેયં માયાવાપાઙ્કુરસ્ય તત્ ॥ ૧૯/૨૦॥ (તુષકમ્બુકવજ્જ્ઞેયં)
– સ્વાયમ્ભુવાગમઃ ॥ વિદ્યાપાદઃ । ૨-પાશવિચારઃ । ૧॥

તદેકં સર્વભૂતાનામનાદિ નિબિડં મહત્ ।
પ્રત્યાત્મસ્થસ્વકાલાન્તાપાયિશક્તિસમૂહવત્ ॥ ૨૦/૨૧॥
– મૃગેન્દ્રાગમઃ ॥ વિદ્યાપાદઃ । ૭-પાશલક્ષણપ્રકરણમ્ । ૮॥

તાસાં માહેશ્વરી શક્તિઃ સર્વાનુગ્રાહિકા શિવા ।
ધર્માનુવર્તનાદેવ પાશ ઇત્યુપચર્યતે ॥ ૨૧/૨૨॥ (ધર્માનુવર્ત્તનાદેવ)
– મૃગેન્દ્રાગમઃ ॥ વિદ્યાપાદઃ । ૭-પાશલક્ષણપ્રકરણમ્ । ૧૧॥

પરિણામયત્યેતાશ્ચ રોધાન્તં કાર્કચિત્ત્વિષા ।
યદોન્મીલનમાધત્તે તદાનુગ્રાહિકોચ્યતે ॥ ૨૨/૨૩॥
– મૃગેન્દ્રાગમઃ ॥ વિદ્યાપાદઃ । ૭-પાશલક્ષણપ્રકરણમ્ । ૧૧॥

વાગીશ્વરી ચ શુદ્ધાધ્વમૂલોપાદાનકારણમ્ ।
નોપાદાનં વિના કાર્યં કદાચિદુપલભ્યતે ॥ ૨૩/૨૪॥
– વિશ્વસારોત્તરમ્ ॥ ??॥

યાઽથ કુણ્ડલિની શક્તિર્માયાકર્માનુસારિણી । (યથા)
નાદબિન્દ્વાદિકં કાર્યં તસ્યા ઇતિ જગત્સ્થિતિઃ ॥ ૨૪/૨૫॥
– વિશ્વસારોત્તરમ્ ॥ ??॥

તસ્યાશ્ચતસ્રો વાગ્રૂપા વૃત્તયો વૈખર્યાદયઃ ।
વૈખરી મધ્યમા ચાન્યા પશ્યન્તી સૂક્ષ્મસંજ્ઞિતા ॥ ૨૫/૨૬॥

– વિશ્વસારોત્તરમ્ ॥ ??॥

માયાતત્ત્વં જગદ્બીજમવિનાશ્યશિવાત્મકમ્ ।
વિભ્વેકમકલં સૂક્ષ્મમનાદ્યવ્યયમીશ્વરમ્ ॥ ૨૬/૨૭॥
– સ્વાયમ્ભુવાગમઃ ॥ વિદ્યાપાદઃ । ૨-પાશવિચારઃ । ૮॥

તદેકમશિવં બીજં જગતશ્ચિત્રશક્તિમત્ ।
સહકાર્યધિકારાન્તસંરોધિ વ્યાપ્યનશ્વરમ્ ॥ ૨૭/૨૮ ॥
– મૃગેન્દ્રાગમઃ ॥ વિદ્યાપાદઃ । ૯-માયાલક્ષણપ્રકરણમ્ । ૨॥

શુદ્ધેઽધ્વનિ શિવઃ કર્તા પ્રોક્તોઽનન્તોઽસિતે પ્રભુઃ ॥ ૨૮/૨૯॥
– કિરણાગમઃ ॥ વિદ્યાપાદઃ । ૩-કર્મપટલઃ । ૨૬બ॥

ગ્રન્થિજન્યકલાકાલવિદ્યારાગનૃમાતરઃ ।
ગુણધીગર્વચિત્તાક્ષમાત્રાભૂતાન્યનુક્રમાત્ ॥ ૨૯/૩૦॥
– મૃગેન્દ્રાગમઃ ॥ વિદ્યાપાદઃ । ૧૦-કલાદિકાર્યપ્રકરણમ્ । ૧॥

ધર્માધર્માત્મકં કર્મ તચ્ચ ત્રિવિધમર્થતઃ ।
જાત્યાયુર્ભોગદં યેન નામિશ્રં પચ્યતે ક્વચિત્ ॥ ૩૦/૩૧॥
– વિશ્વસારોત્તરમ્ ॥ ??॥

કર્મ વ્યાપારજન્યત્વાદદૃષ્ટં સૂક્ષ્મભાવતઃ ।
જનકં ધારકં ભોગ્યમધ્યાત્માદિત્રિસાધનમ્ ॥ ૩૧/૩૨॥
– મૃગેન્દ્રાગમઃ ॥ વિદ્યાપાદઃ । ૮-કર્મવિચારપ્રકરણમ્ । ૩બ-૪અ॥

તત્સત્યાનૃતયોનિત્વાદ્ધર્માધર્મસ્વરૂપકમ્ ।
સ્વાપે વિપાકમભ્યેતિ તત્સૃષ્ટાવુપયુજ્યતે ॥ ૩૨/૩૩॥

માયાયાં વર્તતે ચાન્તે નાભુક્તં ક્ષયમેતિ ચ ॥ ૩૩/૩૪॥
– મૃગેન્દ્રાગમઃ ॥ વિદ્યાપાદઃ । ૮-કર્મવિચારપ્રકરણમ્ । ૪બ-૫॥

અથાત્માઽવિમલો બદ્ધઃ પુનર્મુક્તશ્ચ દીક્ષયા । (અથાત્માવિમલો)
વિજ્ઞેયઃ સ ત્રિધાવસ્થઃ કેવલઃ સકલોઽમલઃ ॥ ૩૪/૩૫॥
– સ્વાયમ્ભુવાગમઃ ॥ વિદ્યાપાદઃ । ૧-પશુવિચારઃ । ૫॥

અચેતનો વિભુર્નિત્યો ગુણહીનોઽક્રિયોઽપ્રભુઃ ।
વ્યાઘાતભાગશક્તશ્ચ શોધ્યો બોધ્યોઽકલઃ પશુઃ ॥ ૩૫/૩૬॥
– સ્વાયમ્ભુવાગમઃ ॥ વિદ્યાપાદઃ । ૧-પશુવિચારઃ । ૬॥

યદ્યશુદ્ધિર્ન પુંસોઽસ્તિ સક્તિર્ભોગેષુ કિઙ્કૃતા ।
શુદ્ધે પુંસિ ન તદ્ભોગો જાઘટીતિ વિપશ્ચિતઃ ॥ ૩૬/૩૭॥
– સ્વાયમ્ભુવાગમઃ ॥ વિદ્યાપાદઃ । ૨-પાશવિચારઃ । ૪॥

ચૈતન્યં દૃક્ક્રિયારૂપં તદસ્યાત્મનિ સર્વદા ।
સર્વતશ્ચ યતો મુક્તૌ શ્રૂયતે સર્વતોમુખમ્ ॥ ૩૭/૩૮॥
– મૃગેન્દ્રાગમઃ ॥ વિદ્યાપાદઃ । ૨-પરમોક્ષનિરાસપ્રકરણમ્ । ૫॥

સદપ્યભાસમાનત્વાત્તન્નિરુદ્ધં પ્રતીયતે ।
વશ્યોઽનાવૃતવીર્યસ્ય સોઽત એવાઽવિમોક્ષણાત્ ॥ ૩૮/૩૯॥ (સ્રોત)
– મૃગેન્દ્રાગમઃ ॥ વિદ્યાપાદઃ । ૨-પરમોક્ષનિરાસપ્રકરણમ્ । ૬॥

વિના સમ્ભવતીત્યાહ વિદ્યાદર્શિતગોચરઃ ।
રાગેણ રઞ્જિતસ્યાઽપિ બુદ્ધ્યાદિકરણૈર્યુતઃ ॥ ૩૯/૪૦॥
– મૃગેન્દ્રાગમઃ **
(કલોદ્દલિત ચૈતન્યો વિદ્યાદર્શિતગોચરઃ ।
રાગેણ રઞ્જિતશ્ચાપિ બુદ્ધ્યાદિકરણૈર્યુતઃ ॥
– સ્વાયમ્ભુવાગમઃ ॥ વિદ્યાપાદઃ । ૧-પશુવિચારઃ । ૧૦॥)

માયાદ્યવનિપર્યન્તે તત્વભૂતાત્મવર્ત્મનિ । (માયાદ્યવનિપર્યન્ત)
ભુઙ્ક્તે તત્ર સ્થિતાન્ ભોગાન્ભોગૈકરસિકઃ પુમાન્ ॥ ૪૦/૪૧॥ (સ્થિતો)
– સ્વાયમ્ભુવાગમઃ ॥ વિદ્યાપાદઃ । ૧-પશુવિચારઃ । ૧૧॥

ભોગોઽસ્ય વેદના પુંસઃ સુખદુઃખાદિલક્ષણઃ । (સુખદુઃખાદિલક્ષણા)
તાં સમર્થિતચૈતન્યઃ પુમાનભ્યેતિ કર્મતઃ ॥ ૪૧/૪૨॥
– સ્વાયમ્ભુવાગમઃ ॥ વિદ્યાપાદઃ । ૧-પશુવિચારઃ । ૧૨॥

કર્મતશ્ચ શરીરાણિ વિષયાઃ કરણાનિ ચ ।
ભોગસંસિદ્ધયે ભોક્તુર્ભવન્તિ ન ભવન્તિ ચ ॥ ૪૨/૪૩॥
– સ્વાયમ્ભુવાગમઃ ॥ વિદ્યાપાદઃ । ૧-પશુવિચારઃ । ૧૩॥

એવં માયાઞ્જનસ્થોઽણુર્નિજદોષતિરસ્કૃતઃ ।
યાતિ તન્મયતાં તેષુ માયાભોગેષુ રઞ્જિતઃ ॥ ૪૩/૪૪॥
– સ્વાયમ્ભુવાગમઃ ॥ વિદ્યાપાદઃ । ૧-પશુવિચારઃ । ૧૪॥

સંસારી વિષયી ભોક્તા ક્ષેત્રી ક્ષેત્રજ્ઞ એવ ચ ।
શરીરી ચેતિ બન્ધાત્મા સકલઃ સોચ્યતે બુધૈઃ ॥ ૪૪/૪૫॥ (સકલશ્ચોચ્યતે)

– સ્વાયમ્ભુવાગમઃ ॥ વિદ્યાપાદઃ । ૧-પશુવિચારઃ । ૧૫ ॥

તમઃશક્ત્યધિકારસ્ય નિવૃત્તેસ્તત્પરિચ્યુતૌ ।
વ્યનક્તિ દૃક્ક્રિયાનન્ત્યં જગદ્બન્ધુરણોઃ શિવઃ ॥ ૪૫/૪૬ ॥

– મૃગેન્દ્રાગમઃ ॥ વિદ્યાપાદઃ । ૫-પઞ્ચકૃત્યપ્રકરણમ્ । ૧ ॥

યેષાં શરીરિણાં શક્તિઃ પતત્યવિનિવૃત્તયે । (પતત્યપિનિવૃત્તયે)
તેષાં તલ્લિઙ્ગમૌત્સુક્યં મુક્તૌ દ્વેષો ભવસ્થિતૌ ॥ ૪૬/૪૭ ॥

ભક્તિશ્ચ શિવભક્તેષુ શ્રદ્ધા તચ્છાસકે વિધૌ ॥ ૪૭/૪૮ ॥

– મૃગેન્દ્રાગમઃ ॥ વિદ્યાપાદઃ । ૫-પઞ્ચકૃત્યપ્રકરણમ્ । ૪-૫અ ॥

તન્નિપાતાચ્ચ તસ્યેત્થમજ્ઞસ્યાપ્યભિલાષિણઃ ।
બુદ્ધિરુત્પદ્યતેઽકસ્માદ્વિવેકેનાત્મવર્ત્તિના ॥ ૪૮/૪૯ ॥

– મતઙ્ગપારમેશ્વરાગમઃ ॥ વિદ્યાપાદઃ । ૪-અધિકાતરતત્ત્વપ્રકરણમ્ । ૪૫ ॥

વિવેકિનો વિરક્તસ્ય જિજ્ઞાસા ચોપજાયતે ।
જિજ્ઞાસોપેતચૈતન્યં પશું સંસારસાગરાત્ ॥ ૪૯/૫૦ ॥

જિઘૃક્ષયા યુનક્ત્યેનં યુક્તં પ્રેરયતિ પ્રભુઃ ॥ ૫૦/૫૧ ॥

– મતઙ્ગપારમેશ્વરાગમઃ ॥ વિદ્યાપાદઃ । ૪-અધિકાતરતત્ત્વપ્રકરણમ્ । ૪૬-૪૭અ ॥

પ્રેરણે પ્રેરકઃ શ્રીમાન્દ્વયોરપિ સ મન્ત્રરાટ્ ।
અનુગ્રાહ્યસ્ય વિનયે તથાઽનુગ્રાહકસ્ય ચ ॥ ૫૧/૫૨ ॥ (તથાનુગ્રાહકસ્ય)
કારુણ્યે ત્વનયોર્યસ્માત્તયોર્યોગઃ સુદુર્લભઃ ॥ ૫૨/૫૪ ॥

– મતઙ્ગપારમેશ્વરાગમઃ ॥ વિદ્યાપાદઃ । ૪-અધિકાતરતત્ત્વપ્રકરણમ્ । ૪૭બ-૪૮ ॥

સ દેશિકમનુપ્રાપ્ય દીક્ષાવિચ્છિન્નબન્ધનઃ ।
પ્રયાતિ શિવસાયુજ્યં નિર્મલો નિરુપપ્લવઃ ॥ ૫૩/૫૪ ॥ (નિરનુપ્લવઃ)

– સ્વાયમ્ભુવાગમઃ ॥ વિદ્યાપાદઃ । ૧-પશુવિચારઃ । ૧૮ ॥

તત્ત્વૈરેભિર્નિબદ્ધાત્મા સર્વધર્મૈશ્ચ સંયુતઃ ।
નાઽનેન શક્યતે મોક્તું વર્જ્ય દીક્ષાં શિવાત્મિકામ્ ॥ ૫૪/૫૫ ॥

– સર્વજ્ઞાનોત્તરાગમઃ ॥ ક્રિયાપાદઃ । ૯-અધ્વપ્રકરણમ્ । ૨૦૨ ॥

કતૃશક્તિરણોર્નિત્યા વિભ્વી ચેશ્વરશક્તિવત્ । (કર્તૃશક્તિરણોર્નિત્યા)
તમશ્છન્નતયાઽર્થેષુ નાભાતિ નિરનુગ્રહા ॥ ૫૫/૫૬ ॥ (તમશ્છન્નતયાર્થેષુ)

– મૃગેન્દ્રાગમઃ ॥ વિદ્યાપાદઃ । ૧૦-કલાદિકાર્યપ્રકરણમ્ । ૩ ॥

વિભુઃ સંજ્ઞાનરૂપોઽપિ પ્રદેશે વેત્તિ યેન તત્ ।
કિઞ્ચિજ્જ્ઞસ્તેન સઃ પ્રોક્તો વ્યવધાનાનિદર્શનાત્ ॥ ૫૬/૫૭ ॥
– પરાખ્યતન્ત્રમ્ ॥ ૧-પશુપદાર્થવિચારઃ । ૯૧બ-૯૨અ ॥

સ્વલ્પેઽપિ વ્યઞ્જકે સ્વલ્પં મહન્મહતિ તત્સ્થિતમ્ ।
યાદૃક્તાદૃગ્ભવેત્તસ્ય પ્રદીપસ્તિમિરે યથા ॥ ૫૭/૫૮ ॥
– પરાખ્યતન્ત્રમ્ ॥ ૧-પશુપદાર્થવિચારઃ । ૯૦બ-૯૧અ ॥

સ ચેતનઃ સ્મૃતો જીવો યદા શક્ત્યા તુ યુજ્યતે ।
અન્યથા નિષ્કલો હ્યાત્મા વિષસુપ્તેવ લક્ષ્યતે ॥ ૫૮/૫૯ ॥
– નિશ્વાસકારિકાગમઃ *
(એતૈર્વિહીનં યદાત્માનં વિષસુપ્તે ચ લક્ષ્યતે ।
તથા હિ લક્ષ્યતે દેવિ એતૈર્હીનસ્તુ ચેતનઃ ॥
– નિશ્વાસકારિકાગમઃ ॥ જ્ઞાનકાણ્ડઃ । ૧૨ । ૯૩ ॥ )

ગુરુર્યથાઽગ્રતઃ શિષ્યાન્સુપ્તાન્દણ્ડેન બોધયેત્ । (ગુરુર્યથાગ્રતઃ)
શિવોઽપિ મોહનિદ્રાયાં સુપ્તાચ્છક્ત્યા પ્રબોધયેત્ ॥ ૫૯/૬૦ ॥
– કિરણાગમઃ ॥ વિદ્યાપાદઃ । ૫-શક્તિપટલઃ । ૬બ-૭અ ॥

યથા ભેષજસામર્થ્યાદશક્તાંનાં બલં પરમ્ ।
તેન તચ્છક્તિયોગેન સામર્થ્યમમિતં ભવેત્ ॥ ૬૦/૬૧ ॥
– કિરણાગમઃ *
(યથા ભેષજસામર્થ્યાદશક્તાનાં બલં પરમ્ ॥
યાતિ તચ્છક્તિસામર્થ્યાદનન્તસ્ય પરે બલમ્ ।
તેન સામર્થ્યયોગેન યોનિં પ્રેરયતે ક્ષણાત્ ॥
– કિરણાગમઃ ॥ વિદ્યાપાદઃ । ૪-પતિપટલઃ । ૧૩બ-૧૪ ॥ )

શિવત્વાદ્યુજ્યતે મોક્ષે પશુત્વાદ્યુજ્યતે તનૌ ।
ભોગેષ્વપિ ચ સામર્થ્યાત્કર્મણો મુનિસત્તમ ॥ ૬૧/૬૨ ॥

ઈશ્વરાધિષ્ઠિતાત્માઽસાવસ્વતન્ત્રો યતસ્તુ સઃ ॥ ૬૨/૬૩ ॥
– પરાખ્યતન્ત્રમ્ !!

નિત્યવ્યાપકચિચ્છક્તિનિધિરપ્યર્થસિદ્ધયે ।
પાશવં શામ્ભવં વાપિ બલમન્વેષ્ટિ નાન્યથા ॥ ૬૩/૬૪ ॥
– મૃગેન્દ્રાગમઃ *
(નિત્યવ્યાપકચિચ્છક્તિનિધિરપ્યર્થસિદ્ધયે ।

પાશવં શામ્ભવં વાપિ નાન્વિષ્યત્યન્યથા બલમ્ ॥)

– મૃગેન્દ્રાગમઃ ॥ વિદ્યાપાદઃ । ૭-પાશલક્ષણપ્રકરણમ્ । ૫॥)

વિશ્વસ્યાઽનેકરૂપસ્ય જ્ઞાનમેકં શિવાત્મકમ્ ।
વ્યાપકં વિમલં શાન્તં ભુક્તિમુક્તીતિ યેન તત્ ॥ ૬૪/૬૫॥

– કાલોત્તરાગમઃ ॥ ??॥

એકૈવ વસ્તુતઃ શૈવી યા શક્તિર્નિર્મલા પરા ।
અવિનાભાવિની શમ્ભોઃ શુચેરુષ્ણમિવ પ્રભોઃ ॥ ૬૫/૬૬॥
તયાઽઽત્મશિવયોઃ સન્ધિઃ શિવબોધપરાપરા ॥ ૬૬/૬૭॥

– નિશ્વાસકારિકાગમઃ ॥ ??॥

નાધ્યક્ષં નાપિ તલ્લૈઙ્ગં ન શાબ્દમપિ શાઙ્કરમ્ ।
જ્ઞાનમાભાતિ વિમલં સર્વદા સર્વવસ્તુષુ ॥ ૬૭/૬૮॥

– મૃગેન્દ્રાગમઃ ॥ વિદ્યાપાદઃ । ૫-પઞ્ચકૃત્યપ્રકરણમ્ । ૧૬॥

અસ્માત્પ્રવિતતાદ્બન્ધાત્પરસંસ્થાનિરોધકાત્ । (તસ્માત્)
દીક્ષૈવ મોચયત્યૂર્ધ્વં શૈવં ધામ નયત્યપિ ॥ ૬૮/૬૯॥

– સ્વાયમ્ભુવાગમઃ ॥ વિદ્યાપાદઃ । ૨-પાશવિચારઃ । ૨૪॥

અનયોઃ શાસને સિધ્દ્વા દીક્ષા ક્ષપણદાનયોઃ ।
દાનં નામ સ્વસત્તૈવ યા સા જ્ઞાનક્રિયાત્મિકા ॥ ૬૯/૭૦॥

– મતઙ્ગપારમેશ્વરાગમઃ ॥ વિદ્યાપાદઃ । ૪-અધિકાતરતત્ત્વપ્રકરણમ્ । ??-૫૮બ॥

સા શક્તિસ્તસ્ય સંસ્પર્શાદ્વ્યક્તીભૂતા સુનિર્મલા ।
પત્યુર્દાનં તદેવોક્તં ન સ્વયં વ્યજ્યતે પશોઃ ॥ ૭૦/૭૧॥

– મતઙ્ગપારમેશ્વરાગમઃ ॥ વિદ્યાપાદઃ । ૪-અધિકાતરતત્ત્વપ્રકરણમ્ । ૫૯॥

અશરીરં યદાત્માનં પશ્યતિ જ્ઞાનચક્ષુષા ।
તદા ભવતિ શાન્તાત્મા સર્વતો વિગતસ્પૃહઃ ॥ ૭૧/૭૨॥

– દેવ્યામતમ્ ॥ ??॥

**(દેવીકાલોત્તરાગમઃ । ૫૧॥)
દીક્ષાનલપ્લુષ્ટમલસ્ય જન્તોઃ સ્વાક્ષ્યં બલં વ્યક્તિમુપૈતિ યોગાત્ ।
શક્ત્યા વિભોશ્ચુમ્બિતહૃત્પ્રદેશો નાન્યેન પુંસો વિનિવૃત્તિમેતિ ॥ ૭૨/૭૩॥

– મતઙ્ગપારમેશ્વરાગમઃ !!

અનેન ક્રમયોગેન પરાં કેવલતાં ગતઃ ।

અનાદ્યશુદ્ધિશૂન્યત્વાત્ પ્રાપ્નોતિ ન ભવાન્તરમ્ ॥ ૭૩/૭૪॥

– સ્વાયમ્ભુવાગમઃ ॥ વિદ્યાપાદઃ । ૧-પશુવિચારઃ । ૧૯॥

યસ્ય જાગ્રે પ્રલીયન્તે સર્વે ભાવાઃ સુષુપ્તવત્ ।
પર્યાપ્તં તસ્ય વિજ્ઞાનં ત્રિપદં તેન લઙ્ઘિતમ્ ॥ ૭૪/૭૫॥

– નિશ્વાસકારિકાગમઃ ॥ જ્ઞાનકાણ્ડઃ । ૩૨ । ૮૧બ-૮૨અ॥

શિવાર્કશક્તિદીધિત્યા સમર્થીકૃતચિદ્દૃશા ।
શિવં શક્ત્યાદિભિઃ સાર્દ્ધં પશ્યત્યાત્માગતાવૃતિઃ ॥ ૭૫/૭૬॥ (સાર્ધં)

– નિશ્વાસકારિકાગમઃ !!

ઉલ્કાહસ્તો યથા કશ્ચિદ્દ્રવ્યમાલોક્ય તાં ત્યજેત્ ।
જ્ઞાનેન જ્ઞેયમાલોક્ય પશ્ચાજ્જ્ઞાનં પરિત્યજેત્ ॥ ૭૬/૭૭॥

– નિશ્વાસકારિકાગમઃ !!

(સાર્ધત્રિશતિકાલોત્તરાગમઃ ॥ ૨૩-જ્ઞાનામૃતપ્રકરણમ્ । ૨૩ । ૫॥)

યદા મનઃ પરે તત્ત્વે લબ્ધલક્ષ્યં નિલીયતે । (લબ્ધલક્ષો)
તદાહ્યશેષવિજ્ઞાનં વિનાશમુપગચ્છતિ ॥ ૭૭/૭૮॥

– નિશ્વાસકારિકાગમઃ ॥ જ્ઞાનકાણ્ડઃ । ૩૨ । ૩૫॥

અનાખ્યે તુ નિરાલમ્બે અગ્રાહ્યે માનવર્જિતે ।
નસ્તત્ત્વે યોજિતો મુક્ત ઇતિ શાસ્ત્રસ્ય નિશ્ચયઃ ॥ ૭૮/૭૯॥

– નિશ્વાસ ॥ ??॥ *

(અનાખ્યે તુ નિરાલમ્બે હ્યગ્રાહ્યે ભાવવર્જિતે ।
નિસ્તત્ત્વે યોજિતો મુક્ત ઇતિ શાસ્ત્રસ્ય નિશ્ચયઃ ॥

– નિશ્વાસકારિકા => સિદ્ધાન્તશિખામણિઃ તત્ત્વપ્રદીપિકાસહિતઃ)

ભવોદ્ભવપદાતીતો નિષ્કમ્પાર્ચિરિવ સ્થિતઃ । (નિષ્કમ્પાર્ચિરિવ)
મુક્તૌ વ્યક્તશિવત્વોઽસૌ કૃતકૃત્યો યતસ્તતઃ ॥ ૭૯/૮૦॥

– સ્વાયમ્ભુવાગમઃ ॥ વિદ્યાપાદઃ । ૨-પાશવિચારઃ । ૨૬॥

નાત્ર પૂજા નમસ્કારો ન જપો ધ્યાનમેવ ચ ।
કેવલં જ્ઞેયમિત્યુક્તં વેદિતવ્યં ન કિઞ્ચન ॥ ૮૦/૮૧॥

– દેવીકાલોત્તરાગમઃ । ૧૮॥

યથા વાયુસ્સુશીઘ્રોઽપિ મુક્ત્વાઽકાશન્ન ગચ્છતિ ।
જ્ઞેયે નિક્ષિપ્તચિત્તસ્તુ વિષયસ્થો ન મુઞ્ચતિ ॥ ૮૧/૮૨॥ *

(જ્ઞેયં વિક્ષિપ્તચિત્તસ્ય વિષસ્થોઽપિ નિશ્ચલઃ । )

– નિશ્વાસકારિકાગમઃ ॥ જ્ઞાનકાણ્ડઃ । ૩૨ । ૩૯બ-૪૦અ ॥

ઇન્દ્રિયાર્થે યથા ચિત્તં નિત્યં ગચ્છતિ દેહિનામ્ ।
તથા ચૈવેન્દ્રિયાતીતે તસ્ય નૈરાકૃતે પદે ॥ ૮૨/૮૩ ॥ (નૈકાકૃતે)

– નિશ્વાસકારિકાગમઃ ॥ જ્ઞાનકાણ્ડઃ । ૨૭ । ૪ ॥

ક્ષીરક્ષયાદ્યથા વત્સઃ સ્તનાન્માતુર્નિવર્ત્તતે । (ક્ષીરક્ષયે)*
રાગક્ષયાત્તથા પુંસાં મનશ્શીઘ્રં નિવર્ત્તતે ॥ ૮૩/૮૪ ॥ (રાગક્ષયે તથા)*

– નિશ્વાસકારિકાગમઃ ॥ જ્ઞાનકાણ્ડઃ । ૩૨ । ૪૩ ॥

ગોદોહમિષુપાતં વા નયનોન્મીલનમાત્રકમ્ ।
સકૃત્પરપદે યુક્તો ન પુનર્ભવમાપ્નુયાત્ ॥ ૮૪/૮૫ ॥

– નિશ્વાસકારિકાગમઃ ॥ ??॥ !! **

(ગોદોહમિષુપાતં વા નયનોન્મીલનાત્મકમ્ ।
સકૃદ્યુક્તઃ પરે તત્ત્વે સ મુક્તો મોચયેત્પરાન્ ॥

– શ્રીમન્નિશાટન => પરમાર્થસાર)

પશુભાવદ્યદાતીત્ય પતિભવેન તિષ્ઠતિ । (પશુભાવાપદાતીત્ય)*
તત્તસ્ય ગમનં નામ સર્વગે ગમનં કુતઃ ॥ ૮૫/૮૬ ॥

– નિશ્વાસકારિકાગમઃ ॥ જ્ઞાનકાણ્ડઃ । ૩૧ । ૧૪બ-૧૫અ ॥

શિવધામાર્પિતસ્યાઽસ્ય ભોગભોક્તુર્ન જાતુચિત્ ।
ભોક્તૃત્વમધિકારિત્વં પતિકૃત્યાનુકારિતા ॥ ૮૬/૮૭ ॥

– સ્વાયમ્ભુવાગમઃ ॥ વિદ્યાપાદઃ । ૨-પાશવિચારઃ । ૨૫ ॥

વિષસમ્બન્ધિની શક્તિર્યથા મન્ત્રૈર્નિરુધ્યતે । (મન્ત્રૈર્નિરુધ્યતે)
તદા ન તદ્વિષં ક્ષીણમેવં પુંસો મલક્ષયઃ ॥ ૮૭/૮૮ ॥

– કિરણાગમઃ ॥ વિદ્યાપાદઃ । ૨-માયાપટલઃ । ૩૧બ-૩૨અ ॥

અનેકભવિકં કર્મ દગ્ધં બીજમિવાઽણુભિઃ । (દગ્ધબીજમિવાણુભિઃ)*
ભવિષ્યદપિ સંરુદ્ધં યેનેદં તદ્ધિ ભોગતઃ ॥ ૮૮/૮૯ ॥

– કિરણાગમઃ ॥ વિદ્યાપાદઃ । ૬-દીક્ષાકર્મપટલઃ । ૧૯/૨૦ ॥

જાતાયાં ઘટનિષ્પત્તૌ યથા ચક્રં ભ્રમત્યપિ ।
પૂર્વસંસ્કારસંસિદ્ધં તથા વપુરિદં સ્મૃતમ્ ॥ ૮૯/૯૦ ॥

– કિરણાગમઃ ॥ વિદ્યાપાદઃ । ૬-દીક્ષાકર્મપટલઃ । ૧૮/૧૯ ॥

ભગ્ને ઘટે યથા દીપઃ સર્વતઃ સંપ્રકાશતે ।
દેહપાતે તથા ચાત્મા ભાતિ સર્વત્ર સર્વદા ॥ ૯૦/૯૧॥
– દેવ્યામતમ્ ॥ ??॥

પ્રકટયસ્વેદં જ્ઞાનં મદ્ભક્તાનાં વરાનને ।
રક્ષણીયં પ્રયત્નેન તસ્કરેભ્યો ધનં યથા ॥ ૯૧/૯૨॥
– નિશ્વાસકારિકાગમઃ !!

॥ ઇતિ ઉમાપતિશિવાચાર્યસઙ્ગૃહીતશતરત્નસઙ્ગ્રહઃ સમાપ્તઃ ॥

॥ ૐ ચિદમ્બરેશ્વરશિવકામસુન્દરીભ્યાં નમઃ ॥

Notes:

An attempt has been made in the interest of earnest readers; of tracing the shloka-s from the respective source-Agama mentioned in the sa Ngraha (compilation), to the Agama′s publication or text readily available in public domain.

As on the date of uploading this document, it has been noted that some but not all such publications are readily available; but, may nevertheless be found at a later date.

Indicators have therefore been put in place within the sangraha as follows:

॥??॥ The mentioned source-Agama's text or publication could not be traced in public domain so far, hence the chapter/shloka-number etc. remains unrevealed yet.

!! Shloka-s or lines have been mentioned as pertaining to a certain Agama, but the same was not found in the source Agama text publication available in public domain.

* Shloka-s or lines or words were found in the mentioned source-Agama with variation. The latter has been mentioned with the respective shloka, where available.

** Shloka-s or lines were found in a source-text other than that mentioned in the sangraha; and in some instances, with a variation. The source / variation has been mentioned with the respective shloka where available.

The book published by University of Madras 1973 (link 1) has an addendum of about 14 shloka-s (link-2 doesn't).

Related pointers for interested readers:

devyAmatam is also known as nishvAsAkhyamahAtantram.

kAlottarAgama is said to have several recensions, all of which may not be readily available.

nishvAsakArikAgama is one of the upAgama of nishvAsAgama.

nishvAsa (the word) can pertain to nishvAsAgama, nishvAsakArikA/nishvAsakArikAgama, nishvAsottara, etc. that may not be synonymous.

Encoded and proofread by Ruma Dewan

---

*Shataratna Sangraha*
pdf was typeset on February 11, 2024

Please send corrections to *sanskrit@cheerful.com*